दिनाङ्कः ____________

# डी.ए.वी पब्लिक विद्यालया:, दिल्ली-एन.सी.आर
## विषयः - संस्कृतम्
## आदर्श-प्रश्नपत्रम् (२०२६-२७)
## अर्धवार्षिक-परीक्षा
## कक्षा – सप्तमी

**निर्धारिता अवधिः : होरात्रयम्** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः**
- प्रश्नपत्रे चत्वार: खण्डा: सन्ति।
- अस्मिन् प्रश्नपत्रे सप्त पृष्ठानि विंशतिः प्रश्नाः च सन्ति।
- प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण लेखनीयानि।
- प्रश्नपत्रस्य क्रमाङ्कः प्रश्नपत्रानुसारमेव लेखनीयः।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृते एव लेखितव्यानि।

| प्रश्न - संख्या | **(खण्ड- क) अपठितावबोधनम्** | अङ्काः |
|---|---|---|
| **1** | **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत–**<br><br>परिश्रमः सफलतायाः कुञ्जिका भवति । कर्मयोगी मानवः एव सफलतां प्राप्नोति। भाग्यवादी नरः अलसः भवति । यः सर्वदा चिन्तयति यत् भाग्येन एव सर्वं फलति, किन्तु एतत् विपरीतं परिश्रमी नरः उद्यमेन सर्वाणि कार्याणि सिध्यति । यः सर्वदा परिश्रमे एव विश्वसिति। उद्यमेन तस्य जीवनं सुखमयं, वैभवमयं, शान्तिपूर्णं च भवति । अतः सर्वे जनाः घोरपरिश्रमं कृत्वा स्वजीवनं समृद्धशालिनः कर्तुं शक्नुवन्ति । | **10** |
| **(क)** | **एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्)**<br>(i) परिश्रमः सफलतायाः का भवति ?<br>(ii) नरः कानि उद्यमेन सिध्यति ?<br>(iii)परिश्रमी नरः सर्वदा कस्मिन् विश्वसिति ? | **1x2=2** |
| **(ख)** | **पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) जीवनं सुखमयं कथं भवति?<br>(ii) जनाः कथं समृद्धशालिनः भवन्ति?<br>(iii) भाग्यवादी नरः कीदृशः भवति? | **2x2=4** |
| **(ग)** | **निर्देशानुसारम् उत्तरत –(केवलं प्रश्नचतुष्टयम)**<br>(i)**"कर्मयोगी मानवः एव सफलतां प्राप्नोति"** अत्र क्रिया पदं कि अस्ति?<br>(क) कर्मयोगी मानवः (ख) प्राप्नोति (ग) एव (घ) सफ़लतां<br>(ii) **'दुःखमयम्'** इति पदस्य विलोमपदं किम् ?<br>(क) अलसः (ख) सुखमयम् (ग) नरः (घ) भाग्यः | **1x4=4** |

| | | |
|---|---|---|
| | (iii) '**जीवनं शान्तिपूर्णम्**' इत्यस्य किं विशेषणपदम् अत्र प्रयुक्तम् ?<br>(क) जीवनम् (ख) पूर्णम् (ग) शान्तिपूर्णम् (घ) शान्ति:<br>(iv) **भाग्यवादी नरः अलसः भवति**' अत्र कर्तृपदं किम् प्रयुक्तम्?<br>(क) अलसः (ख) भाग्यवादी (ग) नरः (घ) भवति<br>(v) **"परिश्रमेण"** इति पदस्य किं पर्याय पदम् अत्र प्रयुक्तम् ?<br>(क) उद्यमेन (ख) भाग्येन (ग) अलसः (घ) सुखमय: | |
| | **(खण्ड- ख) रचनात्मकं कार्यम्** | **15** |
| **2** | **त्वं राजेशः। त्वं डी.ए.वी.विद्यालये पठसि। अवकाशार्थं स्व-प्रधानाचार्यां प्रति लिखितं पत्रं मञ्जूषाया: उचितपदानि चित्वा रिक्तस्थानानि पूरयित्वा पुनः उत्तर पुस्तिकायां लिखत-**<br><br>सेवायाम्<br>(i)____________ प्रधानाचार्या:<br>डी.ए.वी.विद्यालय:<br>द्वारकानगरम्<br><br>महोदयाः!<br><br>सविनयं (ii) __________ अस्ति यत् अद्य मम पिता ज्वरेण पीडितः अस्ति। अहम् औषधालयं गत्वा पितुः निमित्तम् औषधिम् आनयामि। अस्मात् कारणात् अहं (iii)____________ आगन्तुम् असमर्थः अस्मि।<br>अतः एकस्य दिनस्य (iv) ____________दत्त्वा माम् अनुगृह्णन्तु। धन्यवाद:।<br>(v) ____________ शिष्यः<br>राजेशः<br>कक्षा-सप्तमी<br>( मञ्जूषा– भवताम्, अवकाशं, विद्यालयम्, मान्याः, निवेदनम्) | **1x5=5** |
| **3** | **अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषाया: सहायतया रिक्तस्थानानि पूरयत–**<br><br> | **1x5=5** |

| | | |
|---|---|---|
| | (i) इदम् ________________चित्रम् अस्ति।<br>(ii) चित्रे एका ___________चित्रं रचयति।<br>(iii) अत्र ______________बालका: सन्ति।<br>(iv) द्वौ ______________ कन्दुकेन क्रीडत:।<br>(v) उद्याने बहव: ______________ सन्ति।<br>**(मञ्जूषा - बालिका, षट्, उद्यानस्य, बालकौ, वृक्षा:)** | |
| 4 | **रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत –**<br>**माता-** पुत्र! त्वम् कुत्र गच्छसि?<br>**पुत्रः-** मातः, अहम् (i) __________________।<br>**माता-** किं तव गृहकार्यं पूर्णम् अस्ति?<br>**पुत्रः**- यदा अहं (ii) __________________।<br>**माता-** (iii) ________________________।<br>**पुत्रः-** मात:, अद्य (iv) __________________।<br>**माता-** पश्य, (v) ______________________।<br>**पुत्रः -** अहं गच्छामि।<br>**मञ्जूषा**<br>• क्रीडाक्षेत्रात् आगमिष्यामि तदा करिष्यामि।<br>• प्रतिदिनं तु गृहकार्यं कृत्वा खेलसि।<br>• क्रीडाक्षेत्रं गच्छामि।<br>• क्रिकेट-प्रतियोगिता अस्ति।<br>• तव मित्रं सुनीलः आगच्छति।<br><br>**अथवा**<br>**अधोलिखितं कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत–**<br><br>एकः पिपासितः काकः (i)________पातुम् इतस्ततः अभ्रमत्। सः एकस्मिन् स्थाने एकं (ii) _________अपश्यत्। सः जलं पातुम् प्रयासम्- अकरोत्। जलं घटस्य नीचैः आसीत्। अतः सः जलं (iii) _________असमर्थः अभवत्। सः काकः घटस्य समीपे प्रस्तर-खण्डानि अपश्यत्। काकः प्रस्तरखण्डानि घटे अपातयत्। प्रस्तर-पातेन जलम् (iv) __________________आगच्छत्। काकः जलं पीत्वा – उदपतत्। इत्थं सः (v) _____________ कार्यस्य सिद्धिम् अकरोत्।<br><br>**मञ्जूषा- उपरि, जलं, उपायेन, घटम्, पातुम्** | **1x5=5** |
| | **खण्डः - ग (अनुप्रयुक्त-व्याकरणम्)** | **25** |
| 5 | **अधोलिखितपदानां वर्णसंयोजनं वर्णविच्छेदं च प्रदत्त-विकल्पेभ्यः चित्वा लिखत–**<br>**(i ) प्+ र् + अ + क् + आ + ण् + ड् +अः**<br>**(i)** पर्काण्डः (ख) प्रकाणडः (ग) प्रकाण्डः (घ) प्रकण्डः<br>**(ii) पत्राणि**<br>(क) प् + अ + त् + र् + अ + न् + इ<br>(ख) प् + अ + त् + र् + आ + ण् + इ<br>(ग) प् + अ + त् + र् + आ + ण् + ई<br>(घ) प् + अ + त् + र् + अ + ण् + इ | **1x2=2** |

| | | |
|---|---|---|
| 6 | **अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिविच्छेदं वा कृत्वा पूर्णवाक्यं लिखत – (केवलं प्रश्नत्रयम्)**<br>i) **कस्यापि** समीपे रोटिका शाकं वा न आसीत्।<br>(ii) बालकः **विद्या + आलये** पठति।<br>(iii) किञ्चित् कालं **प्रति + ईक्षां** कृत्वा सिंहः बहिः आगच्छत्।<br>(iv) **नरस्याभरणं** रूपम् अस्ति। | **1x3=3** |
| 7 | **अधोलिखितवाक्येषु समुचितं शब्दरूपं चित्वा वाक्यानि पूरयत –(केवलं प्रश्नचतुष्टयम्)**<br>**(i) _____________ प्रतिदिनं विद्यालयं गच्छामि।**<br>(क) अहं (ख) आवां (ग) वयं (घ) माम्<br>**(ii) सा _____________ पृच्छति।**<br>(क) छात्रायाः (ख) छात्रां (ग) छात्रया (घ) छात्रयोः<br>**(iii) वयं _____________ चित्राणि पश्यामः?**<br>(क) केन (ख) कः (ग) कौ (घ) काम्<br>**(iv) _____________ आम्रफलं सर्वाधिकं मधुरं भवति।**<br>(क) फलम् (ख) फलेषु (ग) फलाय (घ) फलात्<br>**(v) _____________ पर्यावरणं संतुलितं कुर्वन्ति।**<br>(क ) वृक्षाः (ख) वृक्षौ (ग) वृक्षम् (घ) वृक्षम् | **1x4=4** |
| 8 | **अङ्कानां स्थाने उचितंसङ्ख्यावाचकं संस्कृतपदं विकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नत्रयम्)**<br>(i) अत्र _____________ (1) महिला अस्ति।<br>(क) एकः (ख) एकम् (ग) एका (घ) एकादश<br>(ii) वृक्षे _____________ (16) खगाः सन्ति।<br>(क) षट् (ख) षोडश (ग) षट्त्रिंशत् (घ) षट्चत्वारिंशत्<br>(iii)भारते_____________ (29) राज्यानि सन्ति।<br>(क) नवविंशतिः (ख) द्वादश (ग) नवत्रिंशत् (घ) द्वे<br>(iv) उद्याने_____________ (40) आम्र-वृक्षाः सन्ति।<br>(क) चत्वारि (ख) चत्वारिंशत् (ग) चतुर्दश (घ) चतुर्विंशतिः | **1x3=3** |
| 9 | **रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत-(केवलंप्रश्नत्रयम्)**<br>(i) छात्राः **अध्यापिकया** सह उद्यानं गच्छन्ति।<br>(ii) वसा **अस्मभ्यं** नवशक्तिं यच्छति।<br>(iii ) छात्राः **कलमेन** लिखन्ति।<br>(iv) छात्राः **उद्यानं** प्रति गच्छन्ति। | **1x3=3** |
| 10 | **अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः उचितं धातुरूपं चित्वा लिखत—(केवलं प्रश्नचतुष्टयम्)**<br>(i) सिंहः एकां गुहाम् _____________ ?<br>(क)अपश्यत् (ख) अपश्यताम् (ग) अपश्यन् (घ) अपश्यः<br>(ii) सहपाठिनः बालकस्य उपहासं_____________।<br>(क)करोति (ख) कुरुतः (ग) कुर्वन्ति (घ) करोमि<br>(iii) त्वं भोजनस्य विषये _____________।<br>(क) वदतम् (ख) वद (ग) वदतु (घ) वदाव<br>(iv) यूयं अधुना दूरदर्शनं मा _____________।<br>(क) पश्य (ख) पश्यताम् (ग) पश्यत (घ) पश्यतु<br>(V) वयं सर्वे भारतीयाः _________।<br>(क) अस्मि (ख) स्वः (ग) स्मः (घ) सन्ति | **1x4=4** |

| | | |
|---|---|---|
| 11 | **रेखाङ्कितपदेषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा पूर्णवाक्ये लिखत-(केवलं प्रश्नद्वयम्)**<br><br>(i) आवां भोजनं **खाद् + क्त्वा** चलावः।<br>(ii) छात्राः विद्यालयम् **आ + गम् + ल्यप्** अध्ययनं कुर्वन्ति।<br>(iii) शिष्यः गुरुं **प्रणम्य** विद्यां पठति। | **1x2=2** |
| 12 | **मञ्जूषातः उचितम् अव्ययपदं चित्वा पूर्णवाक्ये लिखत-(केवलं प्रश्नचतुष्टयम्)**<br>(i) सा _________ निवसति?<br>(ii) पश्यतु _________ एकः छात्रः धावति।<br>(iii)_________ सोमवासरः भविष्यति।<br>(iv) शिक्षकः परीक्षार्थं___________ पाठान् पाठयति।<br>(v) यदा ग्रीष्मावकाशः भवति________ जनाः भ्रमणाय गच्छन्ति।<br>**(मञ्जूषा- पुनः, तदा, कुत्र, तत्र, श्वः)** | **(½x4=2** |
| 13 | **अधोलिखितवाक्येषु रेखाङ्कितपदेषु उपसर्गं संयोज्य विभज्य वा लिखत – (केवलं प्रश्नद्वयम्)**<br>(i) बालिका **आगच्छति।**<br>(ii) अधुना अहम् **अवगच्छामि।**<br>(iii) निर्धनः प्रातःकाले अत्र-तत्र **वि + हरति।** | **1x2=2** |
| | **खण्डः - घ (पठित-अवबोधनम्)** | **30** |
| 14 | **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**<br>वृक्षाः अस्माकं जीवनस्य आधाराः सन्ति। एते भूमेः उद्भवन्ति। वृक्षाः अपि अस्माकम् इव भुक्त्वा पीत्वा च जीवन्ति। मूलानि वृक्षाणां पादाः भवन्ति। एते पादैः पिबन्ति अतएव पादपाः कथ्यन्ते। मूलानि भूमेः रसं गृहीत्वा अन्येभ्यः अवयवेभ्यः यच्छन्ति येन एते वृक्षाः फलन्ति। वृक्षाः अपि मनुष्याः इव सुखानि दुःखानि च अनुभवन्ति। एतेषु अपि प्राणाः भवन्ति। अतएव एते प्राणिनः इव जायन्ते वर्धन्ते म्रियन्ते च। परन्तु एते अचराः सन्ति। | **5** |
| **क** | **एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) के अस्माकं जीवनस्य आधाराः सन्ति?<br>(ii) वृक्षा: कुत्र उद्भवन्ति?<br>(iii) कानि वृक्षाणां पादाः भवन्ति? | **½×2=1** |
| **ख** | **पूर्णवाक्येन उत्तरत –(केवलं प्रश्नद्वयम्)**<br>(i) वृक्षाः कथं फलन्ति?<br>(ii) वृक्षाः किम् अनुभवन्ति?<br>(iii) वृक्षाः प्राणिनः इव कथं भवन्ति? | **1x2=2** |
| **ग** | **निर्देशानुसारम् उचितं विकल्पं चित्वा लिखत–(केवलं प्रश्नद्वयम्)**<br>(i) 'एतेषु अपि प्राणाः भवन्ति।' अत्र क्रियापदं किम्?<br>(क) एतेषु (ख) प्राणाः (ग) भवन्ति (घ) अपि<br>(ii) गद्यांशे 'सुखानि' इति पदस्य विपरीतपदं किं प्रयुक्तम्–<br>(क) सन्ति (ख) अचराः (ग) दुःखानि (घ) अनुभवन्ति<br>(iii) 'वृक्षाः अस्माकं जीवनस्य आधाराः सन्ति।' अत्र कर्तृपदं किम्?<br>(क) अस्माकम् (ख) वृक्षाः (ग) सन्ति (घ) जीवनस्य | **1x2=2** |

| | | |
|---|---|---|
| 15 | **अधोलिखितं श्लोकं पठित्वा यथानिर्देशम् उत्तरं लिखत-**<br>**विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय।**<br>**खलस्य साधोर्विपरीतमेतत् ज्ञानाय दानाय च रक्षणाय॥** | 5 |
| क | **एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) कस्य विद्या विवादाय भवति?<br>(ii) साधोः धनं किमर्थं भवति?<br>(ii) खलस्य शक्तिः केषां परिपीडनाय भवति? | ½×2=1 |
| ख | **पूर्णवाक्येन उत्तरत –(केवलं प्रश्नद्वयम्)**<br>(i) साधोः विद्या किमर्थं भवति?<br>(ii) कस्य शक्तिः रक्षणाय भवति?<br>(iii) कस्य धनं मदाय भवति? | 1x2=2 |
| ग | **निर्देशानुसारम् उचितं विकल्पं चित्वा लिखत –(केवलं प्रश्नद्वयम्)**<br>(i) 'दुष्टस्य' इति पदस्य पर्यायपदं पद्यांशे किं प्रयुक्तम्?<br>(क) शक्तिः (ख) खलस्य (ग) परेषाम् (घ) साधोः<br>(ii) 'पीडनाय' इति पदस्य विलोमपदं पद्यांशे किं प्रयुक्तम्?<br>(क) ज्ञानाय (ख) साधोः (ग) रक्षणाय (घ) दानाय<br>(iii) 'खलस्य विद्या विवादाय भवति।' अत्र क्रियापदं किम्?<br>(क) विद्या (ख) विवादाय (ग) भवति (घ) खलस्य | 1x2=2 |
| 16 | **अधोलिखितं संवादं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**<br>(सप्तमकक्षायाः सर्वे छात्राः अध्यापिकया सह मनोरञ्जनाय 'एकम् उद्यानम्' गच्छन्ति। भोजन-काले छात्राः एकत्रिताः भवन्ति, ते भोजन-विषये परस्परं वार्तालापं कुर्वन्ति)<br>अध्यापिका - भो छात्राः! युष्माभिः क्रीडनं सम्यक् कृतं न वा?<br>छात्राः - (अति उत्साहेन) कृतम् आचार्ये! सम्यक् कृतम्।<br>अध्यापिका- तर्हि आगच्छत। अधुना मिलित्वा वयं सर्वे भोजनं करिष्यामः। दर्शयन्तु किं किम् अस्ति भवतां भोजने? (सर्वे छात्राः स्वभोजनं दर्शयन्ति परं कस्यापि समीपे रोटिका शाकम् वा न आसीत्।)<br>प्रियाः छात्राः! चिन्तयन्तु कथयन्तु च वयं भोजनं किमर्थं कुर्मः? भोजनेन किं भवति? सुजाते! त्वं वद।<br>सुजाता - भोजनेन शक्तिः प्राप्यते। भोजनेन एव शरीरं सम्यक् कार्यं करोति। | 5 |
| क | **एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) छात्राः कदा एकत्रिताः भवन्ति?<br>(ii) छात्राः किं दर्शयन्ति?<br>(iii) भोजनेन किं प्राप्यते? | ½×2=1 |
| ख | **पूर्णवाक्येन उत्तरत–(केवलं प्रश्नद्वयम्)**<br>(i) छात्राः अध्यापिकया सह मनोरञ्जनाय कुत्र गच्छन्ति?<br>(ii) केन शरीरं सम्यक् कार्यं करोति?<br>(iii) छात्राः परस्परं किं कुर्वन्ति? | 1x2=2 |
| ग | **निर्देशानुसारम् उत्तरत–(केवलं प्रश्नद्वयम्)**<br>(i ) 'एकम्' इति पदस्य विशेष्यपदं गद्यांशे किं प्रयुक्तम्?<br>(क) कुर्मः (ख) भोजनम् (ग) उद्यानम् (घ) छात्राः<br>(ii) 'भोजनेन एव शरीरं कार्यं करोति।' अस्मिन् वाक्ये कर्तृपदं किम्?<br>(क)शरीरम् (ख) एव (ग) भोजनेन (घ) करोति<br>(iii) 'अधुना मिलित्वा वयं सर्वे भोजनं करिष्यामः।' अत्र क्रियापदं किम्?<br>(क) वयम् (ख) भोजनम् (ग) अधुना (घ) करिष्यामः | 1x2=2 |

| | | |
|---|---|---|
| 17 | **रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत-(केवलं प्रश्नचतुष्टयम्)**<br>(i) **<u>सिंहः</u>** बलवान् आसीत्।<br>(ii) छात्रः **<u>कूपम्</u>** अपश्यत्।<br>(iii) **<u>पशूनां</u>** सङ्ख्या न्यूना अभवत्।<br>(iii) **<u>वृक्षाः</u>** प्राणिनः इव आचरन्ति।<br>(iv) **<u>घटस्य</u>** अधः एकं गर्तम् अभवत् | **1x4=4** |
| **18** | **श्लोकं पठित्वा उचितैः पदैः अन्वयपूर्तिं कुरुत -**<br>**अयं निजः परो वेति गणना लघुचेतसाम्।**<br>**उदारचरितानां तु वसुधैव कुटुम्बकम् ॥**<br>**अन्वयः –** (i) अयं _____ परः वा इति (ii) ______ लघुचेतसाम्। ________ तु वसुधा एव (iv) _________।<br>**(मञ्जूषा-गणना, उदारचरितानां, निजः, कुटुम्बकम्)**<br><br>**अथवा**<br>**मञ्जूषातः समुचितपदानि चित्वा श्लोकस्य भावार्थं पूरयित्वा पुनः लिखत –**<br>**को भारः समर्थानां किं दूरं व्यवसायिनाम्।**<br>**को विदेशः सविद्यानां कः परः प्रियवादिनाम्॥**<br>**भावार्थः** – यथा (i)___________ कृते किमपि कार्यं भारं न भवति। व्यवसायिनां कृते किम् अपि स्थानं दूरं न भवति, (ii) ____________ कृते किमपि स्थानं विदेशतुल्यं न भवति तथैव ये (iii) ________प्रियवचनं वदन्ति तेषां कृते कोऽपि (iv) _________ न भवति।<br>**(मञ्जूषा-मानवाः, विदुषां, परः, शक्तियुक्तनरस्य)** | **1x4=4** |
| **19** | **मञ्जूषायां समुचितपदं चित्वा अधोलिखितां कथां पूरयत -**<br>बालः बङ्गप्रदेशे एकस्मिन् (i) _________ पठति स्म। सः अतीव जिज्ञासुः आसीत्। सः यत् पठति तत् (ii) _________ स्म। एकदा सः मार्गे एकं (iii) ________ अपश्यत्। सः घटस्य अधः एकं (iv) ________ अपश्यत्। पुनः पुनः घटस्थापनेन सः गर्तः निर्मितः अभवत्। बालः अचिन्तयत् यदि भूयो भूयः घटस्थापनेन पाषाणशिलायां गर्तः अभवत्। तदा किं पुनः पुनः पठनेन मम मतिः (v)_________ न भविष्यति। सः विद्याभ्यासे संलग्नः अभवत्। सः परीक्षायां (vi)_________ स्थानं प्राप्तवान्। अधुना तस्य (vii)_________ उपहासं न कुर्वन्ति स्म। सत्यम् एव अस्ति (viii)_______ एव अस्ति परमो गुरुः।<br>**(मञ्जूषा-सहपाठिनः, अभ्यासः, विशिष्टं, विस्मरति, कूपम्, विद्यालये, तीव्रा, गर्तम्)** | **½×8=4** |
| 20 | **अधोलिखितपदानां समानार्थकं पदं मञ्जूषातः चित्वा समक्षं लिखत–**<br>(i) धत्ते<br>(ii) बहवः<br>(iii) गृहीत्वा<br>**(मञ्जूषा-अनेके, नीत्वा, धारयति)**<br><br>************************* | **1x3=3** |